वटुकभैरवस्तोत्र

नं० १२५१

5711

F - 15

नं॰ २२५१ क
बटुकभैरवस्तोत्रम्
२५ पत्राणि
त॰ मी॰

Complete ग्रं॰ २०३



महेश्वरं ५२

व॰ स्तो १

ॐ श्रीगणेशाय नमः ॐ मेरुपृष्ठे सुखासीनं देव
देवं जगद्गुरुं शंकरं परिपप्रच्छ पार्वती परमेश्वरं
पार्वत्युवाच भगवन्सर्वधर्मज्ञ सर्वशास्त्रागमा
दिषु आपदुद्धारकं मंत्रं सर्वसिद्धिप्रदं नृणां सर्वे
षां चैव भूतानां हितार्थं वांछितं मया विशेषतस्त
स्तु राज्ञां वै शांतिपुष्टिविवर्धनं अंगन्यासकरन्या
स देहन्याससमन्वितं वक्तुमर्हसि देवेश सर्व

ममसर्वं

६ अ

शिरिद्धिविवर्धनं श्रीभैरवउवाच शृणुदेविमहा
मंत्रमापदुद्धारहेतुकं सर्वदुःखप्रशमनं सर्व
शत्रुविनाशनं अपस्मारादिरोगाणांज्वरादीनां
विशेषतः नाशनंस्मृतिमात्रेणमंत्रराजमिमं
प्रिये सर्वकामार्थदं देविराजभोगप्रदंनृणाम्
आपदुद्धारमितियन्मंत्रंवक्ष्याम्यशेषतः ग्रहरो
गभयानांचनाशनंसुखवर्धनं स्नेहाद्वक्ष्यामि

सुखवर्धनं

व· तेमंत्रं सर्वं सारमिमं प्रिये यदुक्तं कीर्तयेन्मर्त्यः स
स्तो· र्वदुःखविवर्जितः सर्वान्कामानवाप्नोति साध
२ कः सिद्धिमेव च सर्वकामार्थदं पुण्यं राज्यभोग
2 प्रदं नृणां आपदुद्धारमिति यन्मंत्रं वक्ष्याम्यशे
षतः पुराणं पूर्वमुच्चार्य देवीप्रणवमुद्धरेत् व
टुकायेति वै पश्चादापदुद्धारणाय च कुरुद्वयं
ततः पश्चाद्वटुकाय पुनः क्षिपेत् देवीप्रणव

मुद्धृत्य मंत्रोद्धारमिमं प्रिये मंत्रोद्धारमिमं ये वित्रे मै
लोके चापि दुर्लभं अप्रकाश्यमिमं मंत्रं सर्वश
क्तिसमन्वितं स्मरणादेवस्य मंत्रस्य भूतप्रेतपि
शाचकाः विद्रवंत्यतिभीतास्त्रैकालरुद्रादिव
प्रजाः पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकं
नाग्निचौरभयं तत्र ग्रहराजभयं तथा नच मा
रीभयं किंचित्सर्वत्र सुखवान्भवेत् आयुरारो

व॰ स्तो॰ ३

गयमैश्वर्यं पुत्रपौत्रादिसंपदः भवंति सततं तस्य
पुत्रकस्यापि पूजनात् पार्वत्युवाच कथमेष भैर
वो नाम आपदुद्धारको मतः त्वया च कथितो दे
वो भैरवः कल्पमुत्तमः तस्य नामसहस्राणि ह्य
युतान्यर्बुदानि च सारमुद्धृत्य तेषां वै नामाष्टशत
कं वद यानि संकीर्तयेन्मर्त्यः सर्वदुःखविवर्जितः
देहांगन्यासकं चैव पूर्वं कुर्याद्धि चतत्ण सर्वान्

कामानवाप्नोति साधकः सिद्धिमेव च ईश्वर उवाच
शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः आपदुद्धा
रकस्येह नामाष्टशतमुत्तमं सर्वपापहरं पुण्यं
सर्वापद्विनिवारणम् सर्वकामार्थदं देवि साधका
[illegible]नां भावहं सर्वमंगलमांगल्यं सर्वोपद्रवना
शनं आयुष्करं पुष्टिकरं श्रीकरं च यशस्करं ना
माष्टशतकस्यास्य छंदोनुष्टुप्प्रकीर्तितं वृह

४-६ नर्जन्यो विपिरवी सरवं किंवं मध्यमयोर्न्ये स्यानामि
कायां त्रिशूलिनं ब्रह्मा रंतु कनि ष्ठा यां तल योस्त्रि

व. दारुणपको नाम ऋषिर्देवो यथ भैरवः सर्वकार्यार्थसिद्धर्थे
लो. विनियोग इति स्मृतः लज्जाबीजं बीजमिति वटुका
ध. येति शक्तिकं प्रणवः कीलकं प्रोक्तमिष्ट सिद्धो प्रयु
पुरांतकं ज्यते शब्दबाड्विनियमनेमितिबीजं समाहितं वटु
मां सा प्रिनं बीजंदिवाङ्कं शांतिकं कीलकं प्रोक्तमिष्ट सिद्धोनि
कर गे तुकर युज्यते रुद्रमंगुष्ठयोर्न्यस्य भैरवं मूर्ध्नि वित्यस्य लला
पृषे दिगंबरं टेभीमदर्शनं नेत्रयोर्भूतहननं सारमेयानुगं स्रुवोः

कर्णयोर्भूतनाथं च प्रेतबाहुं कपोलयोः नासापुटो
ष्ठयोश्चैव भस्माङ्गं सर्पभूषणं अनादिनाथमास्येव
शक्तिहस्तं गलेत्यसेन स्कंधयोर्दैत्यशमनं बाह्वोर
नलतेजसं पाण्योः कपालिनं त्यस्य हृदये मुंडमा
लिनं शांतं वक्षःस्थलेत्यस्य स्तनयोः कामचारिणं
उदरे च सदा तुष्टं देवेशं पार्श्वयोस्तथा देवपालं
पृष्ठदेशे देवदत्तं नाभिदेशके पापौघनाशनं कटा

व. स्तो. ५

वटुकंलिंगदेशाके गुदेरत्नाकरंन्यस्यतनयोर्वीरक्तलोच
ने जानुनोर्घुर्घुराराव जंघयोरक्तलोचनं गुल्फयो:पा पायि
डकासिद्धंपादपृष्टेस्मरेश्वरं आपादमस्तकंचैवआपद
द्धारकंतथा पूर्वेडमरुहस्तंचदक्षिणेदंडधारिणं ख
ड्गहस्तंपश्चिमेचघंटावादिनमुत्तरे आग्नेय्यामग्निव
र्णंचनैऋत्यांचदिगंबरं वायव्यांसर्वभूतस्थमीशान्यां
चाष्टसिद्धिदं ऊर्ध्वंखेचरिणंन्यस्यपाताले प्रेशाहूपि

5

सर्वे

णे एवं विन्यस्य देहे स्वे षडंगेषु ततो न्यसेत् हृदये
ऽनंतनाथाय स्वादिनाथाय मूर्ध्नि स्वानंदपदपूर्वीय
नाथाय याथाशिखायामुच्चास्पित्रिवरनाथाय कवचे सा
विन्यसेत्तथा सहजानंदनाथाय न्यसेन्नेत्रत्रयेन तथा
निःसीमानंदनाथाय अस्त्रे चैव प्रयोजयेत् बीजपूर्वं
विनिन्यास्य न्यासं कुर्याद्धि चक्षणः एवं न्यासविधिं कृ
त्वा यथावन्नंदनं ततः ध्यानं तस्य प्रवक्ष्यामि यथा ध्या

व॰ त्वापठेन्नरः शुद्धस्फटिकसंकाशंसहस्रादित्यवर्चसं
स्तो॰ नीलजीमूतसंकाशंनीलांजनसमप्रभं अष्टबाहुं
८ त्रिनयनंचतुर्बाहुंद्विबाहुकं दंष्ट्राकरालवदनंनू
6 पुरारावसंकुलं भुजंगमेखलंदेविमग्निवर्णशिरोरु
हं दिगंबरंकुमारीशंवटुकाख्यंमहाबलं खट्वांगमसि
पाशंचशूलंदक्षिणभागतः डमरुंचकपालंचवरदं
भुजगंतथा अग्निवर्णसमोपेतंसारमेयसमन्वितं

ध्यात्वाजपेन्मंत्रं स्पष्टः सर्वकामानवाप्नुयात् ॐअ
स्यश्रीआपदुद्धारणवटुकभैरवस्तोत्रमंत्रस्य बृह
दारण्यकऋषिरनुष्टुप्छंदः श्रीवटुकभैरवोदेवता
ह्रींबीजं वटुकायशक्तिः प्रणवःकीलकं सर्वका
मार्थसिद्ध्येजपेविनियोगः बृहदारण्यकऋषये
नमः शिरसि अनुष्टुप्छंदसेनमोमुखे श्रीवटुकभै
रवोदेवतायेनमो हृदये ह्रींबीजायनमो गुह्ये श्री

बटुकायषडाङ्गयेनमः पादयो ॐकीलकायनमः ना
भौ जपेविनियोगः यनमः सर्वांगेषु इतिऋष्यादिन्या
सः अथषडंगन्यासः अथदेहन्यासः ॐभैरवायनमः
मूर्ध्नि भीमदर्शनायनमो ललाटे भूतनाथायनमो
नेत्रयोः सारमेयानुगायनमः भ्रुवोः भूतनाथाय
नमः कर्णयोः प्रेतवाहनायनमः कपोलयोः भ
स्मांगायनमो नासारंध्रयोः सर्वार्थरूपायनम ॐह

ब॰ स्तो॰ ८

योः अनादिभूतायनम आस्ये शक्तिहस्तायनमः
कंठे दैत्यशमनायनमः स्कंदयोः अतुलतेजसे
नमो बाह्वोः करालिनेनमः पाण्योः मुंडमालिने
नमो हृदये दांतायनमो वक्षसि कामचारिणेन
मः स्तनयोः मदोत्कटायनम उदरे क्षेत्रेशायनमः
पार्श्वयोः क्षेत्रपालायनमः पृष्ठे क्षेत्रज्ञायनमो
नाभौ पापौघनाशायनमः कट्यां वटुकायनमो

व॰
स्तो॰
८

लिंगे रक्तकायनमो गुदे रक्तलोचनायनमो ऊर्वोः
चूर्डुरारावायनमो जान्वोः रक्तपायिनेनमो जंघयोः
पादुकासिद्धायनमो गुल्फयोः सुरेश्वरायनमः पाद
पृष्टे आपदुद्धारकायनमो मस्तके उमरुहस्तायन
मः पूर्वे दंडधारिणेनमो दक्षिणे खङ्गहस्तायनमः
पश्चिमे चंडाननादिनेनमः उत्तरे अग्निवर्णायनमः
आग्नेये दिगंबरायनमो नैऋते सर्वभूतस्थायनमः

वायवे अष्टसिद्धायनमः ईशाने खेचरिणेनम ऊ
र्ध्वे शेषानूपिणेनमः पाताले इतिदेहन्यासः भूतना
थायनमो हृदये आदिनाथायनमो मूर्ध्नि आनंद
नाथायनमः शिखायां सिद्धशाबरनाथायनमः
कवचे सहजानंदनाथायनमः नेत्रयोः निःसीमा
नंदनाथायनमः अस्त्रायफट् अथकरन्यासः ओंह्रां
वांअंगुष्ठाभ्यांनमः ओंह्रींवींतर्जनीभ्यांस्वाहा ओंह्रूं

वूं मध्यमाभ्यां वषट् ॐ ह्रैं वैं अनामिकाभ्यां हुं ॐ ह्रौं वौं
कनिष्ठकाभ्यां वौषट् ॐ ह्रः वः करतलकरपृष्ठाभ्यां
फट् अथ हृदयादिन्यासः ॐ ह्रां वां हृदयाय नमः ॐ
ह्रीं वीं शिरसे स्वाहा ॐ ह्रूं वूं शिखायै वषट् ॐ ह्रैं वैं क
वचाय हुं ॐ ह्रौं वौं नेत्राभ्यां वौषट् ॐ ह्रः वः अस्त्राय
फट् इति षडंगः अथ ध्यानम् ॐ करकलितकपा
लः कुंडलीदंडपाणिः तरुणतिमिरनीलो व्या

लयज्ञोपवीती दत्तसमयसपर्याविघ्नविच्छेद
हेतुर्जयति वटुकनाथः सिद्धिदः साधकानां १
स्फटिकसदृशं कुंडलोद्भासिवक्त्रं दिव्याकल्पै
र्नवमणिमयैः किंकिणीनूपुराद्यैः दीप्ताका
रं विशदवदनं सुप्रसन्नं महेशं हस्ताब्जाभ्यां व
टुकमनिशं शूलखड्गौ दधानं १ करसविभं त्रि
नयनं रक्तांगरागस्रजं स्मेरास्यं वरदं कपालम

व॰ स्तो॰ १॰

10

भयं शूलं दधानं करैः नीलग्रीवमुदारभूषणा
युतं शशीनांशुखंडोज्वलं बधूकारुणवाससंभ
यहरं देवं सदा भावयेत् २ लाद्रिकांतं प्राशी शा
कलयं खंडमालं महेशं दिग्वस्त्रं पिंगकेशं डम
रुमथ सृणिं खड्गशूलाभयानि नागं घंटां कपालं
करसरसिरुहैर्बिभ्रतिं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं म
णिमयविलसत्किंकिणीनूपुराढ्यं इति मन्त्रराज

न्मोध्यानानि अथमूलमंत्रन्यासः ॐह्रीं अंगुष्टा
भ्यांनमः वटुकायतर्जनीभ्यांस्वाहा आपदुद्धार
णायमध्यमाभ्यांवषट् कुरुकुरुअनामिकाभ्यां
ॐ वटुकायकनिष्ठकाभ्यांवौषट् ह्रींकरतलकर
पृष्ठाभ्यांफट् अथहृदयादिन्यासः ॐह्रींहृदयाय
नमः वटुकायशिरसेस्वाहा आपदुद्धारणायशिखा
यैवषट् कुरुकुरुकवचायहुम् वटुकायनेत्राभ्यां

वौषट् ह्रीं अस्त्राय फट् इति षडंगः अथ ध्यानम् नीलाद्रिमहाकायकल्पान्तदहनोपम भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि अथ मूलमंत्रः ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं इति मंत्रः मूलमंत्रमष्टोत्तरशतं प्रतिदिनं जपेत् तदनंतरं स्तोत्रपाठं कुर्यात् ॐ भैरवो भूतनाथश्च भूतात्मा भूतभावनः क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो वि

व· स्तो· ११

रात् श्मशानवासी मांसाशी खर्पराशी स्मरांतकृत्
रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः करालः
कालशमनः कलाकाष्ठातनुः कविः त्रिनेत्रो बहुने
त्रस्तथापिंगललोचनः शूलपाणिः खड्गपाणिः
कंकाली धूम्रलोचनः अभीरुर्भैरवीनाथो भूतिदो यो
गिनीपतिः धनदोधनहारी च धनवान् प्रतिभानवान्
नागहारो नागपाशो व्योमकेशः कपालभृत् कालः

व· कपालमालीचकमनीयःकलानिधिः त्रिलोचनोज्वल
स्तो· नेत्रस्त्रिशिखीचत्रिलोकपः त्रिनेत्रतनयोडिंभःशांतः
१२ शांतजनप्रियः वटुकोवटुकेशश्चखट्वांगवरधारकः
12 भूताध्यक्षःपशुपतिर्भिक्षुकःपरिचारकः धूर्तोदिगं
बरःशूरोहरिणःपांडुलोचनः प्रशांतःशांतिदःशुद्धः
शंकरप्रियबांधवः ब्रह्ममूर्त्तिर्निधीशश्चज्ञानचक्षुस्त
पोमयः ब्रह्माधारःघडाधारःसर्पयुक्तःशिखीसखः

भूयरोभूयराधीशोभूपतिर्भूयरात्मजः कंकालस्तथा
रीमुंडीचनागयज्ञोपवीतवान् जृंभणोमोहनस्तं
भीमारणःक्षोभणस्तथा शुद्धनीलांजनप्रख्योदैत्य
हामुंडभूषितः वलिभुग्बलिभुङ्नाथोबालोबालप
राक्रमः सर्वापत्तारणोदुर्गोदुष्टभूतनिषेवितः का
मीकलानिधिकांतःकामिनीवशकृद्वशी सर्वसिद्धि
प्रदोवैद्यःप्रभुर्विष्णुरितीवहि अष्टोत्तरशतेनाम्ना

व० भैरवस्यमहात्मनः मयातेकथितंदेविरहस्यंसर्व
स्तो० कामदं यइदंपठतिस्तोत्रंनामाष्टशतमुत्तमं नतस्य
१३ दुरितंकिंचिन्नरोगाणांभयंतथा नशत्रुभ्योभयंकिं
13 चित्प्राप्नुयान्मानवःक्वचित् पातकानांभयंनैवपठे
स्तोत्रमनुत्तमं मारीभयेराजभयेतथाचौराग्निजे
भये औत्पातिकेमहाघोरेतथादुःस्वप्नजेभये बंध
नेचतथाघोरेपठेद्यःस्तोत्रमुत्तमं सर्वंप्रशममं

यातिभयंभैरवकीर्तनात् एकादशसहस्रंतुउर
श्चरणमुच्यते यःत्रिसंध्यंपठेद्देविसंवत्सरमतन्द्रितः
ससिद्धिंप्राप्नुयाद्दिष्टांदुर्लभामपिमानवैः षण्मासे
भूमिकामस्तुजपित्वाप्राप्नुयान्महीं राजाशत्रुविना
शार्थीजपेन्मासाष्टकंतथा रात्रौवारत्रयंदेविनाश
येत्त्वेविषाद्रवम् धर्मार्थीवासुतार्थीवादारार्थीयस्तु
मानवः पठेन्मासत्रयंदेविवारमेकंतथानिशि य

व॰ नेष्वत्रांनद्याकाशगान्सात्तुयात्राश्वसंशयः रोगीरोगा
स्तो॰ न्मुच्यतेदेविसत्यंनसंशयः निगडेस्थापिव
१४ द्वोयः काराग्रहनिपातितः पूर्वंखलावंधनंप्राप्नः
पठेद्देवदिवानिशं योयांसमीहतेकामांस्तांस्तां
प्राप्नोतिमानवः गुप्तकार्श्यमदातव्यंनदेयंयस्य
कस्यचित् सत्कुलीनायपुत्राय(?)ऋजुचित्ताय
शीलिने दद्यात्स्तोत्रमिदंपुण्यंसर्वकामफलप्रद
14

म् भैरवोपि प्रहृष्टोभूत्स्वयं च महेश्वरः एवंश्रु
त्वा ततो देवी नामाष्टशतमुत्तमम् संतोषं परम
प्राप भैरवस्य महात्मनः संजप्यापरयाभक्त्यास
दा सर्वेश्वरेश्वरि देवि स्तोत्रमिदं पुण्यं सर्वकाम
फलप्रदं पठितव्यं ततो देवि नाम्नामष्टोत्तरं शतं
प्राप्नुयात्परमां सिद्धिं वाणीं लक्ष्मीं न संशयः इति
श्रीरुद्रयामले तंत्रे उमामहेश्वरसंवादे श्रीपडक्षा

व॰ स्तो॰ २५

रणवटुकभैरवस्तोत्रं समाप्तम् ॥

15

